**नवदशः पाठः**

# गुरुदक्षिणा



'गुरुदक्षिणा' अयं शब्दः प्राचीनभारतीयाः अध्ययनाध्यापनपरम्परायाः पारिभाषिकशब्दः न तु पौरोहित्यपरकः शब्दः। विद्यासमाप्तेः अनन्तरं शिष्याः गुरवे गुरुदक्षिणां समर्पयन्ति स्म। गुरुदक्षिणां समर्प्य एव शिष्यः प्राप्तविद्यायाः सार्थक्यम् अनुभवति स्म। गुरुदक्षिणेयं विद्यायाः पूर्णतां द्योतयतीति। अत्र महाकविकालिदासस्य रघुवंशमहाकाव्यात् गुरुदक्षिणासम्बन्धिताः केचन श्लोकाः प्रदत्ताः। प्रदत्तेषु श्लोकेषु गुरुदक्षिणार्थिनः कौत्सस्य तथा दातुः महाराजरघोः उदात्तभावस्य निरूपणं विद्यते। याचकः आवश्यकतायाः अधिकम् एकम् अपि पणं स्वीकर्तुं सिद्धः नास्ति, परं दाता यत् धनं कुबेरात् प्राप्तं तत्सर्वमपि दातुमुत्सुकः। अपरिग्रहस्य उदात्तो भावः अत्र महाकविना प्रस्तुतः तस्यैव सौन्दर्यं पाठेऽस्मिन् प्रस्तुतम्।

*तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोष जातम् ।*
*उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥1॥*

**अन्वयः** - विश्वजिति अध्वरे निःशेषविश्राणितकोषजातम् तं क्षितीशम् उपात्तविद्यः गुरुदक्षिणार्थी वरतन्तुशिष्यः कौत्सः प्रपेदे।

**शब्दार्थः** -

| | | |
|---|---|---|
| विश्वजिति अध्वरे | - | विश्वजित् यज्ञ (की दक्षिणा) में |
| निःशेषविश्राणितकोषजातम् | - | दान में दे दिए जाने के कारण जिसका खजाना रिक्त हो गया है |
| तं क्षितीशम् | - | उस रघु के पास |
| उपात्तविद्यः | - | विद्या पढ़कर |
| गुरुदक्षिणार्थी | - | गुरुदक्षिणा के लिए (१४ करोड़ स्वर्ण मुद्राएँ लेने की इच्छा से) |
| वरतन्तुशिष्यः कौत्सः | - | वरतन्तु के शिष्य कौत्स |
| प्रपेदे | - | आए |

*स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः ।*
*श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥2॥*

**अन्वयः** - अनर्घशीलः यशसा प्रकाशः आतिथेयः सः वीतहिरण्मयत्वात् मृण्मये पात्रे अर्घ्यम् निधाय श्रुतप्रकाशम् अतिथिम् प्रत्युज्जगाम।

**शब्दार्थः** -

| | | |
|---|---|---|
| अनर्घशीलः | - | निश्छल व्यवहार/असाधारण स्वभाव वाला |
| यशसा प्रकाशः | - | यशस्वी |
| आतिथेयः | - | अतिथिसेवी |
| सः | - | वह (रघु) |
| वीतहिरण्मयत्वात् | - | सुवर्ण पात्रों के अभाव में |

| | | |
|---|---|---|
| मृण्मये पात्रे | - | मिट्टी के पात्र में |
| श्रुतप्रकाशम् | - | वेदाध्ययन से देदीप्यमान् (कौत्स के) |
| प्रत्युज्जगाम | - | पास आए |

*तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ।*
*अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि सम्भावयितुं वनान्माम् ॥3॥*

**अन्वयः** - अर्हतः तव अभिगमेन मे मनः न तृप्तम्, किन्तु नियोगक्रियया उत्सुकम् शासितुः आज्ञया अपि आत्मना वा माम् सम्भावयितुम् वनात् प्राप्तोऽसि।

**शब्दार्थः** -

| | | |
|---|---|---|
| अर्हतः | - | पूज्य के (आपके) |
| अभिगमेन | - | आगमन मात्र से |
| तृप्तम् | - | सन्तुष्ट |
| नियोगक्रियया | - | दान की क्रिया से |
| उत्सुकम् | - | उत्सुक को (मुझ रघु को) |
| शासितुः | - | गुरु को |
| आत्मना | - | स्वेच्छा से |
| सम्भावयितुम् | - | कृतार्थ करने के लिए |

*इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।*
*स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ॥4॥*

**अन्वयः** - अर्घ्यपात्रानुमितव्ययस्य रघोः इति उदारम् अपि गाम् निशम्य वरतन्तुशिष्यः स्वार्थोपपत्तिम् प्रति दुर्बलाशः सन् तम् इति अवोचत्।

**शब्दार्थः** -

| | | |
|---|---|---|
| अर्घ्यपात्रानुमितव्ययस्य | - | अर्घ्यपात्र से (यज्ञ में हुए) व्यय को व्यक्त करने वाले |
| गाम् | - | वाणी को |
| स्वार्थोपपत्तिम् | - | अपनी कार्य सिद्धि में |
| दुर्बलाशः सन् | - | निराश होते हुए |
| तम् | - | उस रघु से / को |
| अवोचत् | - | कहा |

*समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै ।*
*स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ॥5॥*

**अन्वयः** - समाप्तविद्येन मया महर्षिः गुरुदक्षिणायै विज्ञापितः अभूत्, स च चिराय अस्खलितोपचारां ताम् भक्तिम् एव पुरस्तात् अगणयत्।

**शब्दार्थः** -

| | | |
|---|---|---|
| समाप्तविद्येन मया | - | समस्त विद्याओं को पढ़ने के बाद मैंने |

| | | |
|---|---|---|
| गुरुदक्षिणायै | - | गुरुदक्षिणा के लिए |
| विज्ञापित: | - | प्रार्थना की |
| चिराय | - | बहुत दिनों तक |
| अस्खलितोपचाराम् | - | नियमपूर्वक की गई |
| तां भक्तिम् | - | उस गुरु सेवा को |
| पुरस्तात् | - | श्रेष्ठ दक्षिणा |
| अगणयत् | - | गिना/माना |

*निर्बन्धसञ्जातरुषाऽर्थकार्श्यमचिन्तयित्वा गुरुणाऽहमुक्तः ।*

*वित्तस्य विद्यापरिसङ्ख्यया मे कोटीश्चतस्रो दश चाहरेति ॥6॥*

**अन्वय:** - निर्बन्धसञ्जातरुषा गुरुणा अर्थकार्श्यम् अचिन्तयित्वा अहम् 'वित्तस्य चतस्रः दश च कोटीः मे आहर' इति विद्यापरिसङ्ख्यया उक्तः ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| निर्बन्धसञ्जातरुषा | - | बार-बार (गुरुदक्षिणा के लिए) आग्रह करने पर क्रोध से |
| अर्थकार्श्यम् | - | दरिद्रता/गरीबी को |
| अचिन्तयित्वा | - | विचार न करके |
| वित्तस्य | - | धन की/मुद्रा की |
| चतस्रः दश च कोटीः | - | चौदह करोड़ |
| आहर | - | दो |
| विद्यापरिसङ्ख्यया | - | चौदह विद्याओं की सङ्ख्या के मान से |

*गुर्वर्थमर्थी श्रुतपारदृश्वा रघोः सकाशादनवाप्य कामम् ।*

*गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतारः ॥7॥*

**अन्वय:** - 'श्रुतपारदृश्वा गुर्वर्थम् अर्थी रघोः सकाशात् कामम् अनवाप्य वदान्यान्तरम् गतः' इति अयम् मे परीवादनवावतारः मा भूत् ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| श्रुतपारदृश्वा | - | शास्त्रों में पारङ्गत |
| गुर्वर्थम् | - | गुरु के लिए |
| अर्थी | - | गुरुदक्षिणायाचक |
| सकाशात् | - | पास से |
| कामम् | - | मनोरथ को |
| अनवाप्य | - | पूर्ण न होने पर |
| वदान्यान्तरम् | - | अधिक दान देने वाले दूसरे दानी के पास |
| परिवादनवावतारः | - | निन्दा का नया अवतार |

*तथेति तस्याविततथं प्रतीतः प्रत्यग्रहीत्सङ्गरमग्रजन्मा ।*

*गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥8॥*

**अन्वय:** - अग्रजन्मा प्रतीत: सन् तस्य अवितथम् सङ्गरम् इति प्रत्यग्रहीत्, तथा रघु: अपि गाम् आन्तसाराम् अवेक्ष्य कुबेरात् अर्थम् निष्क्रष्टुम् चकमे ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| अग्रजन्मा | - | ब्राह्मण (कौत्स) |
| प्रतीत: सन् | - | प्रसन्न होते हुए |
| अवितथम् | - | सत्य |
| सङ्गरम् | - | प्रतिज्ञा को |
| प्रत्यगृहीत् | - | स्वीकार किया |
| गाम् | - | पृथिवी को |
| आन्तसाराम् | - | सारहीन |
| अवेक्ष्य | - | समझकर |
| कुबेरात् | - | कुबेर से |
| अर्थम् | - | धन को |
| निष्क्रष्टुम् | - | लेने की इच्छा |
| चकमे | - | किया |

*तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।*

*दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ॥9॥*

**अन्वय:** - भूपति: अभियास्यमानात् कुबेरात् लब्धम् वज्रभिन्नम् सुमेरो: पादम् इव स्थितम् तम् भासुरहेमराशिम् समस्तम् एव कौत्साय दिदेश ।

**शब्दार्थ:** -

| | | |
|---|---|---|
| भूपति: | - | रघु: |
| अभियास्यमानात् | - | युद्ध के लिए चढ़ाई किए जाने वाले (से) |
| कुबेरात् | - | कुबेर से (धन के देवता) |
| वज्रभिन्नम् | - | वज्र से काट कर गिराये हुए |
| सुमेरो: | - | सुमेरु के |
| पादम् इव | - | टुकड़े के समान |
| भासुरहेमराशिम् | - | चमकती हुई सुवर्ण राशि (को) |
| दिदेश | - | दे दी |

*जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।*
*गुरुप्रदेयाधिकनि:स्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥10॥*

**अन्वय: -** तौ द्वौ अपि साकेतनिवासिन: जनस्य अभिनन्द्यसत्वौ अभूताम् । गुरुप्रदेयाधिकनि:स्पृह: अर्थी, अर्थिकामात् अधिकप्रद: नृप: च ।

**शब्दार्थ: -**

| | | |
|---|---|---|
| तौ द्वौ | - | वे दोनों (दाता और याचक) |
| साकेतनिवासिन: जनस्य | - | अयोध्या निवासी लोगों का |
| अभिनन्द्यसत्वौ | - | अभिनन्दन के पात्र |
| अभूताम् | - | हो गए |
| गुरुप्रदेयाधिकनि:स्पृह: | - | गुरुदक्षिणा से अधिक न लेने का इच्छुक |
| अर्थी | - | याचक (कौत्स) |
| अर्थिकामात् | - | याचक की कामना से |
| अधिकप्रद: | - | अधिक देने वाला |
| नृप: | - | राजा (रघु) |

## अभ्यास:

1. **एकपदेन उत्तरं लिखत -**

(क) वरतन्तुशिष्य: क: आसीत् ?

(ख) अनर्घशील: क: ?

(ग) वरतन्तुशिष्य: स्वार्थोपपत्तिं प्रति कीदृश: सञ्जात: ?

(घ) गुरुणा किम् अचिन्तयित्वा उक्त: ?

(ङ) रघु: कस्मात् धनं प्राप्तुम् इष्टवान् ?

2. **एकवाक्येन उत्तरं लिखत -**

(क) रघु: कस्मात् हेमराशिम् लब्धवान् ?

(ख) वरतन्तु: कौत्सं कियत् धनं याचितवान् ?

(ग) विश्वजिति अध्वरे रघु: कीदृश: सञ्जात: ?

(घ) रघु: गां कीदृशीम् अमन्यत् ?

(ङ) तौ द्वौ कस्य अभिनन्द्यसत्वौ अभूताम् ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत -**

(क) रघो: समीपं क: किमर्थम् आगत: ?

(ख) कीदृश: रघु: कस्मिन् पात्रे अर्घ्यं निधाय अतिथिं प्रत्युज्जगाम ?

(ग) वारं-वारं प्रार्थयन्तं कौत्सं गुरु: किमुक्तवान् ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(मनः, द्वावपि, मा, अर्थम्, मृण्मये)

(क) रघुः .......................... पात्रे अर्घ्यं दत्तवान्।

(ख) तव अभिगमेन मे ................... न तृप्तम्।

(ग) ....................... अभूताम् अभिनन्दसत्वौ।

(घ) मे परिवादनवावतारः ..................... भूत्।

(ङ) रघुः कुबेरात् ..................... निष्क्रष्टुम् चकमे।

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) कौत्सः | दानी |
| (ख) वरतन्तुः | पृथिवीम् |
| (ग) रघुः | धनदेवः |
| (घ) कुबेरः | गुरुदक्षिणार्थी |
| (ङ) गाम् | गुरुः |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत –**

(क) कुबेरः रघुं धनं दत्तवान्। ☐

(ख) रघुः हिरण्मयपात्रे कौत्साय अर्घ्यं दत्तवान्। ☐

(ग) कौत्सः धनं स्वीकर्त्तुं गुरुसमीपं गतवान्। ☐

(घ) कौत्सः गुरुदक्षिणार्थी आसीत्। ☐

(ङ) रघुः वरतन्तुशिष्यः आसीत्। ☐

7. **अधोलिखितशब्दानां मूलशब्दं विभक्तिं वचनं च लिखत –**

| शब्दः | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| यथा – गुरुणा | गुरु | तृतीया | एकवचनम् |
| (क) यशसा | | | |
| (ख) अध्वरे | | | |
| (ग) जनस्य | | | |
| (घ) गुरुदक्षिणायै | | | |
| (ङ) रघोः | | | |
| (च) कौत्साय | | | |
| (छ) कुबेरात् | | | |
| (ज) क्षितीशम् | | | |

**8. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| **पदम्** | **सन्धिविच्छेदः** | **सन्धिनाम** |
| --- | --- | --- |
| यथा -इत्यर्धम् | इति + अर्धम् | यण्सन्धिः |
| (क) तवार्हतः | | |
| (ख) अप्याज्ञया | | |
| (ग) गुर्वर्थम् | | |
| (घ) सुमेरोरिव | | |

**9. अधोलिखितशब्दानां पर्यायशब्दान् लिखत -**

यथा - वित्तम्　　धनम्

(क) अध्वरः

(ख) क्षितीशः

(ग) गुरुः

(घ) याचकः

**10. अव्ययैः वाक्यनिर्माणं कुरुत -**

यथा -अपि　　अहम् अपि पठामि।

(क) इति

(ख) न

(ग) प्रति

(घ) इव

**11. प्रदत्तश्लोकान्वयस्य पूर्तिं कुरुत -**

निर्बन्धसञ्जातरुषा .................... अर्थकार्श्यम् ...................... अहं वित्तस्य चतस्रः दश च कोटीः मे ................. इति .................... उक्तः।

## योग्यताविस्तारः -

- पाठे आगतानां श्लोकानां सस्वरगायनं कुरुत।
- रघोः अन्यान् आदर्शगुणान् अन्विष्य लिखत।